Totalbhakti.com

# पुरुष-सूक्तम्

ॐ सस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।

स भूमि सँवर्त स्पृत्वात्त्यतिष्ठद्दशांगुलम् ।। 1 ।।

पुरुष एवेद सँर्व यसद्भूतं यच्च भाब्यम् ।

उतामृतत्वस्येशानो यदन्नेनातिंरोहति ।।2।।

एतावानस्य महिमातो ज्यायांश्च पुरुषः ।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।3।।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।

ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।।4।।

ततो विराडजायत विराजो अधि पुरुषः ।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।5।।

तस्मादूयज्ञात्सर्वहुतः सम्भृतं पृपदाज्यम् ।

पशून्ताँश्चक्रेवा यव्यानारागयान्ग्राम्याश्च ये ।।6।।

तस्माद् यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।

छन्दाँसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।7।।

तस्मादश्वा अजायन्त ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात्तस्माञ्जाता अजावयः ।।8।।

तं य्यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।

www.totalbhakti.com

तेन देवा अयजन्त साध्या ऋषयश्च ये ।।9।।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।

मुखं किमस्यासीत् किम्बाहु किमरु पादाउच्येते ।।10।।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।

ऊरुतदस्य यद् वैश्य पद्भ्यां शूद्रोअजायत ।।11।।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।

श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ।।12।।

नाभ्या आसीदन्तरिक्षं शीर्णो द्यौः समवर्त्तत ।

पद्भ्यांभूमिर्दिशः श्रोत्रात्तथालोकाँऽअकल्पयन् ।।13।।

यत् पुरुषेणा हविषा देवा यज्ञमतन्वत ।

वसन्तो अस्यासीदाज्यं ग्रीष्म इध्म शरद्धविः ।।14।।

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।

देवा यद् यज्ञ तन्वानाऽवघ्नन् पुरुषम्पशुम् ।।15।।

यज्ञेन यज्ञ मयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

तेह नाके महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा।।16।।

अद्भ्यः सम्भृतं पृथिव्यै रसाच्च विश्वकर्मणमं समवर्त्तताग्रे ।

त्स्य त्वष्टा विदधद् रुपमेति तन्मर्त्यस्य देवत्त्वमाजानमग्रे ।।17।।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् ।

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।।18।।

प्रजाषतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।

तस्य योनिं परिपश्यन्ति घीरास्तस्मिन् हतस्थुर्भु वनानि विश्वा ।।19।।

www.totalbhakti.com

यो देवेभ्य आतपति यो देवानां पुराहितः ।

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।।20।।

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुबन् ।

यस्त्वैवं ब्राह्मणों विद्यातस्य देवा असन्वशे ।।21।।

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे

नक्षत्राणि रुपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुं म इषाण।

सर्वलोकं म इषाण ।। 22।।

www.totalbhakti.com

www.totalbhakti.com